# 2021

## SANSKRIT — HONOURS

**Paper : CC-14**

**(Sanskrit Composition and Communication)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

विशेषोल्लेखं विना सर्वेषां प्रश्नानाम् उत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदातव्यम्।

**Section - A**

**Unit : I**

**(Marks : 15)**

1. अधोदत्तेषु यथेच्छं ***सूत्रद्वयं*** सोदाहरणं व्याख्येयम्। 5×2

(a) कर्तुरीप्सिततमं कर्म।

(b) साधकतमं करणम्।

(c) ध्रुवमपायेऽपादानम्।

(d) षष्ठी शेषे।

***अथवा,***

अधोरेखाङ्कितेषु पदेषु यथेच्छं ***पञ्चानां*** कारकविभक्तिप्रयोगः सकारणं सूत्रोल्लेखपूर्वकं निर्णेयः। 2×5

(a) <u>द्रोणो</u> व्रीहिः।

(b) <u>हरिः</u> सेव्यते।

(c) रामेण <u>वाणेन</u> हतो वाली।

(d) <u>विप्राय</u> गां ददाति।

(e) <u>हरये</u> नमः।

(f) <u>भगवन्</u>! त्रायस्व मां विपदः।

(g) <u>ग्रामात्</u> आयाति।

(h) <u>शकटेन</u> विद्यालयं गच्छति छात्रः।

**2.** अधोलिखितेषु वाक्येषु ***पञ्चानां*** यथानिर्देशं वाच्यपरिवर्तनं विधेयम्। 1×5

(a) गोपः गां दोग्धि पयः। (कर्मवाच्येन लेखनीयम्)

(b) वामनः बलिं याचते वसुधाम्। (कर्मवाच्येन लेखनीयम्)

(c) ग्रामम् अजां नयति। (कर्मवाच्येन लेखनीयम्)

(d) आचार्येण माणवकः धर्मं भाष्यते। (कर्तृवाच्येन लेखनीयम्)

(e) पाचकेन तण्डुलाः ओदनं पच्यन्ते। (कर्तृवाच्येन लेखनीयम्)

(f) वयं हसामः। (भाववाच्येन लेखनीयम्)

(g) अहं गच्छामि। (भाववाच्येन लेखनीयम्)

**Unit : II**
**(Marks : 10)**

**3.** अधोलिखितेषु ***पञ्चानां*** परिनिष्ठितरूपं लिख्यताम्। 2×5

(a) √वस् + तव्यत्

(b) √चि + अनीयर्

(c) √दा + यत्

(d) √कृ + ण्वुल्

(e) √पच् + क्त

(f) √भू + णिच् + क्त

(g) √दृश् + तुमुन्

**Section - B**
**Unit : I**
**(Marks : 20)**

**4.** अधोलिखितयोः कस्यचित् ***एकस्य*** संस्कृतभाषया देवनागरलिप्या च अनुवादः करणीयः। 10×1

(a) স্বামী বিবেকানন্দ প্রাচ্য থেকে পাশ্চাত্যে ঈশ্বরের বাণী বহন করে নিয়ে গিয়েছিলেন। তিনি বলেছিলেন— "ঈশ্বর সহস্ররূপে তোমাদের মধ্যে বিরাজ করছেন। অতএব তাঁকে কেন অন্যত্র অন্বেষণ করছ? যিনি ভগবানের সমস্ত সৃষ্টিকে ভালোবাসেন, তিনিই একমাত্র ঈশ্বরের সেবা করেন।"

Swami Vivekananda carried the message of God from East to West. He said, "God exists in you in thousands of forms. Why do you search for God elsewhere? He alone serves God who loves all his creation."

(b) উজ্জয়িনীতে সর্বগুণসম্পন্ন বিক্রমাদিত্য নামক এক রাজা ছিলেন। একদিন তিনি চিন্তা করলেন, এই পৃথিবী অসার। এখানে কেউ অবগত নয় ভবিষ্যতে কখন কী ঘটবে। সুতরাং, অর্জিত ধন দান বা ভোগের দ্বারা সফল করা উচিত। যোগ্য ব্যক্তিকে ধন দান করা উচিত, নচেৎ তা বিনষ্ট হয়। এই মনে করে, তিনি সর্বস্বদক্ষিণ নামক এক যজ্ঞের আয়োজন করলেন। শিল্পিগণ সেই উদ্দেশ্যে একটি সুন্দর মণ্ডপ প্রস্তুত করলেন।

In Ujjayinī there was a king, adorned with all good qualities, Vikramāditya by name. One day he thought that the world is worthless, no one knows when and what will happen in future. So acquired wealth should be made worthy by giving away or by enjoying. Wealth should be given to deserving persons, otherwise it is destroyed. Thinking so, he arranged for a sacrifice called Sarvasvadakṣiṇa. For this, artists made a beautiful pandal.

**5.** अधोलिखितयोः कस्यचि***देकस्य*** अनुच्छेदस्य वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 10

(a) पुरा रत्नाकरो नाम दस्युः वनेषु परिभ्रमन् पथिकान् हत्वा तेषां सर्वस्वं हृत्वा च स्वजनान् पालयति स्म। तथैकदा देवर्षिं नारदमवलोक्य स लगुडप्रहारेण तं हन्तुमुद्यतः। देवर्षिरुवाच – भोः! किं त्वया न ज्ञातं यदनेन पापानुष्ठानेन घोरे नरके तव स्थानं स्यात्। परं येषां कृते एतत् पापं क्रियते, तेषामेकतमोऽपि न ते पापभाग् भविष्यतीति। रत्नाकरो नारदं रज्जुभिर्बद्ध्वा निजालयं गतः, अवदच्च परिजनान् – अपि भवन्तो मत्कृतस्य पापस्य अंशभाजो भविष्यन्तीति? परिजना आहुः – न कथमपि इति।

(b) एकदा काचिद् दरिद्रा रमणी बुद्धस्य समीपम् आगत्य मृतपुत्रस्य पुनर्जीवनाय तस्मात् किञ्चित् भेषजं प्रार्थयामास। स तामुक्तवान्– स तस्याः पुत्रं जीवितं करिष्यति, यदि सा तादृशाद् गृहात् मुष्टिपरिमितं सर्षपमानयेत्, यस्मिन् गृहे कदापि कस्यापि च मृत्युर्नाभवत् इति। शोकार्ता जननी द्वारात् द्वारान्तरं गच्छन्ती अपि तादृशं गृहं न प्राप्तवती। विषण्णहृदया सा प्रत्यावृत्ता।

**Section - C**

**Unit : I**

**(Marks : 20)**

**6.** अधोलिखितेषु विषय***मेकम***वलम्ब्य न्यूनतया पञ्चाशदधिकशतशब्दैः प्रबन्धः लिख्यताम्। 20

(a) वेदानां माहात्म्यम्।

(b) भारतीयसाहित्ये रामायणस्य प्रभावः।

(c) संस्कृतसाहित्ये तव प्रियः कविः।